## 177/2014

Maximum : 100 marks

Time : 1 hour and 15 minutes

1. अजाम् इत्संज्ञाविधायकं सूत्रम्?
   - (A) हलन्त्यम्।
   - (B) उपदेशेऽजनुनासिक इत्।
   - (C) तस्य लोपः।
   - (D) अचश्च।

2. 'अण्', 'अच्' इत्यादि प्रत्याहारसिद्ध्यर्थं पाणिनिना उक्तं सूत्रम्?
   - (A) इको यणचि।
   - (B) अणुदित्सवर्णस्य चाप्रत्ययः।
   - (C) आद्यन्तौ टकितौ।
   - (D) आदिरन्त्येन सहेता।

3. उपदेशः—————।
   - (A) आप्तवाक्यम्।
   - (B) अन्त्योच्चारणम्।
   - (C) आद्योच्चारणम्।
   - (D) गुरुवाक्यम्।

4. प्रगृह्यसंज्ञाविधायकं सूत्रम्।
   - (A) इदूदेद्द्विवचनं प्रगृह्यम्।
   - (B) प्लुतप्रगृह्या अचि नित्यम्।
   - (C) ऋत्यकः
   - (D) अणोऽप्रगृह्यस्यानुनासिकः।

5. नियतोपस्थितिकः —————।
   - (A) प्रातिपदिकार्थः।
   - (B) उपसर्गः।
   - (C) कारणम्।
   - (D) करणम्।

6. 'गौरी' इत्यत्र कः प्रत्ययः?
   - (A) ति।
   - (B) ङीष्।
   - (C) ङीन्
   - (D) ङीप्।

7. 'इत्थम्भूतलक्षणे' इति सूत्रेण का विभक्तिः?
   - (A) चतुर्थी।
   - (B) पञ्चमी।
   - (C) तृतीया।
   - (D) द्वितीया।

8. 'यस्य च भावेन भावलक्षणम्' इत्यनेन ————— विधीयते।
   - (A) षष्ठी।
   - (B) सप्तमी।
   - (C) पञ्चमी।
   - (D) चतुर्थी।

9. विशेषसंज्ञाविनिर्मुक्तः —————— समासः।

(A) केवलसमासः।
(B) विशेषसमासः।
(C) विशेष्यसमासः।
(D) विशेषणसमासः।

10. 'सम्पर्यः' इत्यत्र कः समासः?

(A) द्वन्द्वः।
(B) अव्ययीभावः।
(C) समानाधिकरणतत्पुरुषः।
(D) बहुव्रीहिः।

11. उपपदतत्पुरुषसमासस्य उदाहरणमस्तिः ——————।

(A) यूपदारुः।
(B) अक्षशौण्डः।
(C) उपवनम्।
(D) कुम्भकारः।

12. नञ् समासस्य उदाहरणमस्ति ——————।

(A) निर्मक्षिकम्।
(B) अनश्वः।
(C) अतिमालः।
(D) अर्धर्चः।

13. 'अविद्यमानः पुत्रः यस्य सः' ——————।

(A) अदृष्टपुत्रः।
(B) ईषद्पुत्रः।
(C) अनवद्यपुत्रः।
(D) अपुत्रः।

14. 'भवती' इति पदे कः प्रत्ययः?

(A) ङीष्।
(B) ङीप्।
(C) ङीन्।
(D) ति।

15. वक्तुं इच्छा – ——————।

(A) विवक्षा।
(B) विविक्षा।
(C) बुभुक्षा।
(D) विवदिषा।

16. कस्य भाष्यं महाभाष्यमुच्यते?

(A) मीमांसासूत्रस्य।
(B) न्यायसूत्रस्य।
(C) व्याकरणसूत्रस्य।
(D) वैशेषिकसूत्रस्य।

17. छन्दशास्त्रस्य प्राथमिको ग्रन्थः केन विरचितः?

(A) सायणमुनिना
(B) मायणमुनिना
(C) पिंगलाचार्येण
(D) माध्वाचार्येण

18. निरुक्तकारः कः?

(A) यास्कः।
(B) भास्करः।
(C) अमरसिंहः।
(D) वार्ष्यायणिः।

19. शिक्षा ———————— तु वेदस्य।

(A) पादौ।
(B) घ्राणम्।
(C) हस्तौ।
(D) चक्षुः।

20. नाचिकेतोपाख्यानम् कस्यामुपनिषदि अन्तर्भवति?

(A) केनोपनिषदि।
(B) माण्डूक्योपनिषदि।
(C) मुण्डकोपनिषदि।
(D) कठोपनिषदि।

21. लघुसिद्धान्तकौमुद्याः कर्त्ता कः?

(A) अप्पय्यदीक्षितः।
(B) वरदराजः।
(C) भट्टोजिदीक्षितः।
(D) भर्तृहरिः।

22. 'तत्त्वमसि' इति महाकाव्यं कस्यामुपनिषदि उल्लिखितं भवति?

(A) बृहदारण्यकोपनिषदि।
(B) तैत्तिरीयोपनिषदि।
(C) छान्दोग्योपनिषदि।
(D) ऐतरेयोपनिषदि।

23. पाणिनिप्रणीते शब्दानुशासने कति अध्यायाः सन्ति?

(A) अष्ट।
(B) सप्त
(C) नव।
(D) दश।

24. 'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' कस्येयमुक्तिः?

(A) कात्यायनस्य।
(B) श्रीशङ्करस्य।
(C) भर्तृहरेः।
(D) पतञ्जलेः।

25. एतेषु कतमत् तद्धितान्तं रूपं भवति?

(A) कार्यम्।
(B) तदा।
(C) भोज्यम्।
(D) अवद्यम्।

26. बुद्धचरितस्य कर्त्ता भवति?

(A) अश्वघोषः।
(B) दण्डी।
(C) अमरुकः।
(D) हर्षवर्द्धनः।

27. 'भासनाटकचक्रस्य' प्रथमप्रकाशकाः ——————?

(A) हरिहरशास्त्रिणः।
(B) साम्बशिवशास्त्रिणः।
(C) महादेवशास्त्रिणः।
(D) गणपतिशास्त्रिणः।

28. राजनीतिमाश्रित्य विरचितं नाटकं भवति ——————?

(A) अभिज्ञानशाकुन्तलम्।
(B) मालतीमाधवम्।
(C) मुद्राराक्षसम्।
(D) उत्तररामचरितम्।

29. कस्मिन् भवभूतिर्विशिष्यते?

(A) मालतीमाधवे।
(B) महावीरचरिते।
(C) उत्तररामचरिते।
(D) दशकुमारचरिते।

30. रत्नावली दशरूपकेषु कस्मिन्नन्तर्भवति?

(A) नाटिकायाम्।
(B) प्रकरणे।
(C) भाणे।
(D) व्यायोगे।

31. केरलीयेन विरचितं नाटकं भवति ——————?

(A) मृच्छकटिकम्।
(B) आश्चर्यचूडामणिः।
(C) बालिवधम्।
(D) रावणवधम्।

32. बृहत्त्रय्यामन्तर्भवति ——————।

(A) रघुवंशम्।
(B) कुमारसम्भवम्।
(C) अभिज्ञानशाकुन्तलम्।
(D) शिशुपालवधम्।

33. रामायणे कति काण्डानि सन्ति?

(A) सप्त।
(B) सप्तदश।
(C) सप्ततिः।
(D) सप्तविंशतिः।

34. भगवत्गीता महाभारतस्य कस्मिन्पर्वणि अन्तर्भवति?

(A) विराटपर्वणि।
(B) शान्तिपर्वणि।
(C) वनपर्वणि।
(D) भीष्मपर्वणि।

35. बृहत्कथा केन विरचिता?

(A) क्षेमेन्द्रेन।
(B) कृष्णशर्मणा।
(C) गुणाढ्येन
(D) विष्णुशर्मणा।

36. किरातार्जुनीयमहाकाव्ये युधिष्ठिरस्य गुप्तचरः कः?

(A) अर्जुनः।

(B) वनेचरः।

(C) भीमः।

(D) श्रीकृष्णः।

37. मोहमुद्गरस्य कर्त्ता भवति ———————?

(A) श्रीशङ्करः।

(B) श्रीधरः।

(C) श्रीवल्लभः।

(D) श्रीशङ्कुकः।

38. भट्टिकाव्यमस्ति ———————?

(A) ताटकावधम्।

(B) रावणवधम्।

(C) राघवपाण्डवीयम्।

(D) केशवीयम्।

39. शतकत्रयस्य कर्त्ता भवति ———————?

(A) नारायणपण्डितः।

(B) राजशेखरः।

(C) मुरारिः।

(D) भर्तृहरिः।

40. सोमदेवस्यकृतिरस्ति ———————।

(A) बृहत्कथामञ्जरी।

(B) बृहत्कथासारः।

(C) वेतलपंचविंशतिका।

(D) कथासरित्सागरः।

41. ध्वनिसम्प्रदायस्य प्रमुखः आचार्यः?

(A) कुन्तकः।

(B) आनन्दतीर्थः।

(C) मम्मटः।

(D) आनन्दवर्धनः।

42. 'वाक्यं रसात्मकं काव्यम्' केनोक्तमिदं लक्षणम्?

(A) विश्वनाथेन।

(B) वामनेन।

(C) हेमचन्द्रेण।

(D) भामहेन।

43. नव्यन्यायस्याद्यप्रवर्त्तकः ———————।

(A) उदयनः।

(B) रघुनाथः।

(C) गंगेशः।

(D) गदाधरः।

44. 'काकोलुकीयं' कस्मिन्नन्तर्भवति?

(A) कथासरित्सागरे।

(B) पञ्चतन्त्रे।

(C) जातककथायाम्।

(D) बृहत्कथाश्लोकरञ्जिन्याम्।

45. शास्त्रप्रवृत्तिः कतिविधा?

(A) त्रिविधा।
(B) चतुर्विधा।
(C) पञ्चविधा।
(D) बहुविधा।

46. प्रमाता भवति ——————।

(A) प्रयोतनम्।
(B) विषयः।
(C) सम्बन्धः।
(D) अधिकारी।

47. श्रवणादिव्यतिरिक्तविषयेभ्यो मनसो निग्रहः ——————।

(A) विरागः।
(B) शमः।
(C) तितिक्षा।
(D) दमः।

48. गुरूपदिष्टवेदान्तवाक्येषु विश्वासः ——————।

(A) उपरतिः।
(B) शमः।
(C) श्रद्धा।
(D) तितिक्षा।

49. आवरणविक्षेपरूपशक्तिद्वयात्मकमस्ति ——————।

(A) वस्तु।
(B) अवस्तु।
(C) अज्ञानम्।
(D) ज्ञानम्।

50. सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं किम्?

(A) ज्ञानम्।
(B) अपवादः।
(C) अध्यारोपः।
(D) अज्ञानम्।

51. सतत्त्वतोऽन्यथा प्रथा ——————।

(A) विवर्तः।
(B) विकारः।
(C) आवर्तः।
(D) संचारः।

52. शोणो धावति इत्यत्र का लक्षणा?

(A) अजहल्लक्षणा।
(B) जहदजहल्लक्षणा।
(C) जहल्लक्षणा।
(D) लक्षितलक्षणा।

53. योगस्य कति अङ्गानि सन्ति?

(A) पञ्च। (B) षट्।

(C) सप्त। (D) अष्ट।

54. दशमद्रव्यत्वेन मीमांसकाः स्वीकुर्वन्ति?

(A) तमः। (B) शक्तिम्।

(C) सादृश्यम्। (D) अनुपलब्धिः।

55. तर्कसंग्रहदीपिकायाः कर्त्ता कः?

(A) जयन्तभट्टः। (B) अन्नम्भट्टः।

(C) गदाधरभट्टः। (D) भूषणभट्टः।

56. केन नैय्यायिकेन त्रीण्येव प्रमाणान्यङ्गीकृतानि?

(A) गंगेशेन। (B) विश्वनाथेन।

(C) भासर्वज्ञेन। (D) उदयनेन।

57. नैय्यायिकाभिमतः गुणगुणिनोः सम्बन्धः कः?

(A) संयोगः। (B) विशेषणविशेष्यभावः।

(C) समवायः। (D) आधाराधेयभावः।

58. सादिरनन्तः - ——————।

(A) प्रागभावः। (B) प्रध्वंसाभावः।

(C) अन्योन्याभावः। (D) अत्यन्ताभावः।

59. संस्कारमात्रजन्यं ज्ञानं भवति ——————।

(A) अनुभवः। (B) सुखम्।

(C) स्नेहः। (D) स्मृतिः।

60. सिषाधयिषाविरहविशिष्टसिद्ध्यभावः ——————।

(A) पक्षता। (B) सपक्षः।

(C) विपक्षः। (D) पक्षः।

61. 'गगनारविन्दं सुरभिः अरविन्दत्वात्' इत्यत्र कः हेत्वाभासः?

(A) सव्यभिचारः।
(B) आश्रयासिद्धः।
(C) स्वरूपासिद्धः।
(D) विरुद्धः।

62. सोपाधिको हेतुः ——————।

(A) व्याप्यत्वासिद्धः।
(B) अनैकान्तिकः।
(C) सत्प्रतिपक्षः।
(D) बाधितः।

63. 'भूतले घटाभावः' कस्य अभावस्योदाहरणम्?

(A) प्रध्वंसाभावः।
(B) अत्यन्ताभावः।
(C) अन्योन्याभावः।
(D) प्रागभावः।

64. पिढरपाकवादिनः के?

(A) वैशेषिकाः।
(B) मीमांसकाः।
(C) सांख्याः।
(D) नैय्यायिकाः।

65. आख्यातस्य कर्तरि शक्तिरुच्यते ——————।

(A) सांख्याः।
(B) वैय्याकरणाः।
(C) वेदान्तिनः।
(D) मीमांसकाः।

66. का संज्ञा सुबन्ततिङन्तयोः वैय्याकरणैरङ्गीक्रियते?

(A) प्रादिपदिक।
(B) सर्वनाम।
(C) सवर्ण।
(D) पद।

67. आदिगुरुः ——————।

(A) भगणः।
(B) रगणः।
(C) यगणः।
(D) तगणः।

68. पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः।
षष्ठं गुरु विजानीयादेतत् —————— लक्षणम्।

(A) आर्यायाः।
(B) गीतेः।
(C) श्लोकस्य।
(D) उपजातेः।

69. 'भगण भगण भगण गुरुद्वयं' – कस्य वृत्तस्येदं लक्षणम्?

(A) तोटकम्। (B) दोधकम्।

(C) वसन्ततिलकम्। (D) शार्दूलविक्रीडितम्।

70. रान्नराविह —————— लगौ।

(A) स्रग्धरा। (B) पुष्पिताग्रा।

(C) रथोद्धता। (D) शालिनी।

71. 'सरसिजमनुविद्धं शैवलेनापि रम्यं' – अयं पद्यभागः कस्मिन् वृत्ते रचितः?

(A) वंशस्थम्। (B) भुजङ्गप्रयातम्।

(C) तोटकम्। (D) मालिनी।

72. 'या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री' – अयं पद्यभागः कस्मिन् वृत्ते रचितः?

(A) स्रग्धरा। (B) शिखरिणी।

(C) मन्दाक्रान्ता। (D) प्रहर्षिणी।

73. द्रुतविलम्बितमाह ——————।

(A) नरौ भरौ। (B) नभौ भरौ।

(C) नभौ भतौ। (D) नरौ भतौ।

74. कुवलयानन्दानुसारेण निदर्शनालङ्कारः कतिविधः?

(A) त्रिविधः। (B) चतुर्विधः।

(C) पञ्चविधः। (D) द्विविधः।

75. 'मदेन भाति कलभः प्रतापेन महीपतिः' – कस्यालङ्कारस्योदाहरणम्?

(A) परिणामः। (B) सम्बन्धातिशयोक्तिः।

(C) दृष्टान्तः। (D) दीपकम्।

76. 'कुरङ्गैरुत्तराङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते' – कस्य अलङ्कारस्य उदाहरणम्?

(A) पर्यायोक्तम्। (B) स्वभावोक्तिः।

(C) सहोक्तिः। (D) विशेषोक्तिः।

77. 'धुमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम्' – कस्य अलङ्कारस्य उदाहरणम्?

(A) अनुक्तविषया वस्तूत्प्रेक्षा।
(B) उक्तविषया वस्तूत्प्रेक्षा।
(C) असिद्धविषया हेतूत्प्रेक्षा।
(D) सिद्धविषया हेतूत्प्रेक्षा।

78. 'विनापि तन्वी हारेण वक्षोजौ तव हारिणौ' – कस्य अलङ्कारस्य उदाहरणम्?

(A) परिकरम्।
(B) काव्यलिङ्गम्।
(C) विरोधाभासः।
(D) श्लेषालङ्कारः।

79. कुवलयानन्दानुसारेण अपह्नुतिः कति विधा?

(A) त्रिविधा।
(B) चतुर्विधा।
(C) पञ्चविधा।
(D) षड्विधा।

80. 'तद्भिन्नत्वे सति तद्गतभुयो धर्मवत्वम्' ————————।

(A) सादृश्यम्।
(B) अभेदः।
(C) सारूप्यम्।
(D) आरोपितत्वम्।

81. तत्राधिकगुणत्वेन प्रसिद्धमुपमानम्।

(A) चन्द्रादिः।
(B) मुखादिः।
(C) आह्लादकत्वादिः।
(D) इवादयः।

82. ———————— उपमानस्योपमेयत्व प्रकल्पनम्?

(A) रूपकम्।
(B) उपमेयोपमा।
(C) अनन्वयः।
(D) प्रतीपम्।

83. ———————— विशेषश्चेदुपमानोपमेययोः?

(A) परिणामः।
(B) प्रतिवस्तूपमा।
(C) व्यतिरेकः।
(D) अर्थान्तरन्यासः।

84. रामः भोजनं पश्यति – इत्यस्य कर्मणि प्रयोगः भवति ————————।

(A) रामेण भोजनं दर्शयति।
(B) रामेण भोजनं दृश्यते।
(C) रामेण भोजनं अपश्यत्।
(D) रामेण भोजनं पश्यति।

85. एतासु अकर्मकक्रिया का?

(A) दोग्धि। (B) पश्यति।

(C) पचति। (D) स्वपिति।

86. एतेषु कतमः भावेप्रयोगः?

(A) मया भूयते। (B) रामेण अन्नं भुज्यते।

(C) देवदत्तेन ग्रामः गम्यते। (D) विद्यार्थिना प्रस्नपत्रं दृश्यते।

87. 'सत्यमेव जयते' – इत्यत्र आत्मनेपदस्य साधुत्वं कथम्?

(A) नित्यसत्यत्वात्। (B) आर्षत्वात्।

(C) आप्तोक्तत्वात्। (D) अनिषेध्यत्वात्।

88. त्रिदोषसिद्धान्तः अस्ति ————————?

(A) गान्धर्ववेदे। (B) धनुर्वेदे।

(C) आयुर्वेदे। (D) स्थापत्यवेदे।

89. 'ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति' – सूक्तिरियं कस्यां कृतौ समुपलभ्यते?

(A) मालतीमाधवे। (B) रामायणे।

(C) शिशुपालवधे। (D) उत्तररामचरिते।

90. ज्योतिषशास्त्रानुरोधेन कति राशयः सन्ति?

(A) अष्ट। (B) द्वादश।

(C) सप्तविंशतिः। (D) नव।

91. अष्टाङ्गहृदयस्य रचयिता भवति ————————?

(A) वाग्भटः। (B) चरकः।

(C) शुश्रुतः। (D) भास्करः।

92. सांख्यतत्त्वकौमुद्याः कर्त्ता भवति ————————?

(A) वाचस्पतिमिश्रः। (B) ईश्वरकृष्णः।

(C) श्रीधरः। (D) कपिलः।

93. वेदान्तसारस्य कर्त्ता भवति ——————?

(A) सदानन्दः।
(B) कुमारिलः।
(C) लौगाक्षिभास्करः।
(D) शबरस्वामी।

94. मल्लीनाथः कः?

(A) अर्थशास्त्रस्य व्याख्याकारः।
(B) पञ्चतन्त्रस्य व्याख्याकारः।
(C) बृहत्कथायाः व्याख्याकारः।
(D) पञ्चमहाकाव्यस्य व्याख्याकारः।

95. क्रिस्तुभागवतस्य कर्त्ता भवति ——————?

(A) ऐ.सि.चाक्को
(B) पि.सि. देवस्य।
(C) प्रोफ. जोसफ् मुण्डश्शेरि।
(D) प्रोफ. क्रिस्पोस्।

96. रामेण बाणेन हतः बाली – अस्य कर्तरि प्रयोगः कः?

(A) रामः बाणेन बालीं हतवान्।
(B) रामेण बाणः बालिनं हतवान्।
(C) रामः बाणेन बालिनं हतवान्।
(D) रामः बाणेन बालिनं हन्ति।

97. 'राज्ञि' – राजन् शब्दस्य कस्यां विभक्तौ कस्मिन् वचने भवति इदं रूपम्?

(A) षष्ठी एकवचने।
(B) तृतीया एकवचने।
(C) सप्तमी एकवचने।
(D) सम्बुद्धौ एकवचने।

98. भू धातोः लुटि प्रथमपुरुष एकवचनं रूपं किम्?

(A) भूयात्।
(B) भवेत्।
(C) भवतु।
(D) भविता।

99. एध् धातोः लङि प्रथमपुरुष एकवचनं रूपं किम्?

(A) ऐधिष्ठ।
(B) ऐधत।
(C) एधाञ्चक्रे
(D) एधे।

100. चित्तवृत्तिनिरोधः ——————?

(A) योगः।
(B) अन्तर्मुखत्वम्।
(C) ध्यानम्।
(D) संयमनम्।